बिभेति कदाचन” इत्यत्र भेदस्य स्पष्टत्वाच्चेति संक्षेपः। एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम्। बुद्धिश्च प्रकृतेः प्रथमः परिणामः। सैव महत्तत्त्वमन्तःकरणमप्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात् ममेदं कर्त्तव्यमिति सदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्त्तव्यमिति व्यापारावेशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा अपि बुद्धेरेव। कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमपास्तम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः। बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् कृत्यंशे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्ब्बमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्त्तुर्जन्यत्वे मानाभावात्। “वीतरागजन्मादर्शनात्” अनादित्वम्। अनादेर्नाशासम्भवान्नित्यत्वम्। तत् किं प्रकृत्यादिकल्पनेन। न च “प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते” इत्यनेन विरोध इति वाच्यम् प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैर्गुणैः इच्छादिभिः कर्त्ताहं कर्त्ताहमेव इत्यस्य तदर्थत्वात् “तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः” इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः। धर्म्माधर्म्माश्रयः इति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्म्मणां देहान्तरेण भोगानुपपत्तिः। विशेषगुणयोगत इति। योग्यविशेषगुणसम्बन्धेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहङ्करोमि इत्यादि प्रतीतेः। प्रवृत्त्येति। अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते। प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्माप्यनुमीयत इति भावः। तत्र दृष्टान्तमाह। रथेति यद्यपि रथकर्म्म चेष्टा न भवति तथापि तेन कर्म्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्म्मणा परात्मापीति भावः। अहङ्कारस्येति। अहङ्कारोऽहमिति प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति। मन इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्। विभुरिति। विभुत्वं परममहत्त्वं तच्च पूर्ब्बोक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादीति बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्ब्बोक्ता वेदितव्याः”। ते च “बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा। धर्म्माधर्म्मौ गुणा एते आत्मनः स्युश्चतुर्द्दश” इत्युक्ताः बुद्धिः सुखं दुःखमिच्छा-द्वेषः यत्नःसंख्या परिमाणं पृथक्त्वं संयोगः विभागः भावनाख्यसंस्कारः धर्म्मः अधर्म्मश्चेति। एते च गुणा मनस एवेति सांख्यादयः। “कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मनएवेति” श्रुतेः कामादीनां मनोधर्मत्वावगमात् तथा ६४२पृष्ठे आज्ञानशब्दोदिता अपि। मिता० “किं पुनर्वैषयिकज्ञानेन्द्रियव्यतिरिक्तात्मसद्भावे प्रमाणमित्याशङ्क्याह। “महाभूतानि सत्यानि यथात्मापि तथैव हि। कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति। वाचं वा कोविजानाति पुनः संश्रुत्य संश्रुताम्” या०स्मृ०। “यथा हि पृथिव्यादिमहाभूतानि सत्यानि प्रमाणप्राप्तत्वात्तथात्मापि सत्यः, अन्यथा यदि बुद्धीन्द्रियव्यतिरिक्तो ज्ञाता ध्रुवो न, तर्ह्येकेन चक्षुरिन्द्रियेण दृष्टं वस्त्वन्येन स्पर्शनेन्द्रियेण को विजानाति। यमहमद्राक्षन्तमहं स्पृशामीति। तथा कस्यचित्पुरुषस्य वाचं पूर्वं श्रुत्वा पुनः श्रूयमाणां वाचन्तस्य वागियमिति कः प्रत्यभिजानाति तस्मात् ज्ञानेन्द्रियाद्यतिरिक्तो ज्ञाता ध्रुव इति सिद्धम्। किञ्च। “अतीतार्था स्मृतिः कस्य कोवा स्वप्नस्य कारकः। जातिरूपवयोवृत्तविद्यादिभिरहंकृतः। शब्दादिविषयोद्योगङ्कर्म्मणा मनसा गिरा” या०। “यद्यात्मा ध्रुवो न स्यात्तर्ह्यनुभूतार्थगोचरा स्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबन्धना कस्य भवेत्, नह्यन्येन दृष्टे वस्तुन्यन्यस्य स्मृतिरुपपद्यते। तथा कः स्वप्नज्ञानस्य कारकः। नहीन्द्रियाणाम् उपरतव्यापाराणान्तत्कारकत्वम्। तथाहमेवाभिजनत्वादिसम्पन्न इत्येवंविधानुसन्धानप्रत्ययःकस्य भवति स्थिरात्मव्यतिरिक्तस्य” तथा शब्दस्पर्शादिविषयोपभोगसिद्ध्यर्थमुद्योगं मनोवाक्कायैः कःकुर्य्यात्तस्मादपि बुद्धीन्द्रियव्यतिरिक्त आत्मा-